# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-3) | **प्रश्नपत्रम्**-५ (New & Old) | **गुणाः** - ७० |
| **विषयः** - धर्मशास्त्रम् | **कोड**- CC - 2-3-5 | **समयः** - २ तः ५ |
| **दिनाङ्कः** - ०८/१२/२०१८ | **सन्दर्भग्रन्थः**- याज्ञवल्क्यस्मृतिः (आचाराध्यायः) | |

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः सन्दर्भपूर्वकं भावार्थं लिखत ।** **१०**

१. आदिमद्यावसानेषु भवच्छब्दोपलक्षिता ।
ब्राह्मणक्षत्रियविशं भैक्षचर्या यथाक्रमम् ॥

२. अरोगिणां भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात्सप्तमादूर्ध्वं मातृनः पितृनस्तथा ॥

३. मृते जीवति चापत्यौ या नान्यमुपगच्छति ।
सेहकीर्तिमवाप्नोति मोदते चोभया सह ॥

**प्र-२ एकस्य सविस्तरमुत्तरं दीयताम् ।** **१०**

१. विवाहप्रकारपूर्वकं तद्विधिं च विवेचयन्तु ।

२. गृहस्थधर्मनिरूपणं यथाग्रन्थं क्रियताम् ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ द्वयोः सन्दर्भपूर्वकं भावार्थं लिखत ।** **१०**

१. वेदाथर्वपुराणानि सेतिहासानि शक्तितः ।
जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकी जपेत् ॥

२. गोब्राह्मणानलान्नानिनोच्छिष्टो न यदा स्पृशेत् ।
न निन्दा ताडने कुर्यात् पुत्रं शिष्यं च ताडयेत् ॥

३. अन्नं पर्युषितं भोज्यं स्नेहोक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूम यवगोरसविक्रियाः ॥

**प्र-४ एकस्य सविस्तरमुत्तरं दीयताम् ।** **१०**

१. भक्ष्याभक्ष्यविचारः यथाग्रन्थं प्रस्तूयताम् ।

२. जगतिविवेकविवेचनं ग्रन्थानुसारं क्रियताम् ।

## ॥ तृतीयान्वितिः ॥

**प्र-५ ग्रन्थानुसारं सविस्तरेण द्वयोः विषये लिखत ।** **१०**

१. दातारोनोऽभिवर्धन्तां वेदाः सन्ततिरेव च ।

श्रद्धा च नो मा व्यगमत् बहु देयं च नोऽस्त्विति ॥

२. वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ।

प्रीणयन्ति मनुष्याणां पितृन्श्राद्धेन तर्पिताः ॥

३. यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ।

ललाटे कर्णयोरक्ष्णोरापस्तत् घ्नन्तु सर्वदा ॥

**प्र-६ एकस्य सविस्तरमुत्तरं दीयताम् ।** **१०**

१. राजधर्माः यथाग्रन्थं प्रतिपाद्यताम् ।

२. ग्रहशान्तिविधानं ग्रन्थानुसारं लिखन्तु ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. कति विद्याः? काश्च ताः?

२. का नाम परिषद्?

३. वर्णाः कति? के च ते?

४. ब्रह्मचारी किं किं धारयेत्?

५. विवाहः कतिविधः?

६. ब्राह्मणात् क्षत्रियाणां जातः पुत्रः कः ?

७. ब्राह्मण्यां क्षत्रियाणां जातः पुत्रः कः ?

८. नृपज्ञः क अस्ति?

९. क्षत्रियवैश्ययोः कर्माणि कानि?

१०.मानवाः किं न ज्ञापयेत्?

११.जले किं न क्षिपेत्?

१२.अनध्यायः कदा करणीयः?

१३.गृहशुद्धिः कस्मात् भवति?

१४.कः स्वर्गे महीयते?

१५.कति ग्रहाः? के च ते?

–००–